# श्रीसोमनाथ-संस्कृत-युनिवर्सिटी, वेरावलम्

# परिणामः

# (Outcomes)

# ॥पदविका-कार्यक्रमः॥

# (Diploma Program)

| प्रोग्राम कोड | प्रोग्राम | अपेक्षिताः परिणामाः (Outcomes) |
|---|---|---|
| 06 | पदविका | • एकवर्षात्मके पदविका-कार्यक्रमे अधीत्य छात्रः स्वेन चितस्य विषयस्य प्रारम्भिकं सैद्धान्तिकं ज्ञानं प्राप्स्यति<br>• विषयस्य प्रायोगिकं ज्ञानं प्राप्स्यति<br>• विषयस्य व्यवहरे प्रयोगे क्षमः भविष्यति<br>• स्वस्य नियुक्त्यर्हतां वर्धयिष्यति<br>• स्वव्यवसायद्वारा धनसम्पादने क्षमः भविष्यति<br>• अल्पे काले तत्तद्विषये स्वकौशलं वर्धयिष्यति<br>• सरलमानकसंस्कृतस्य परिचयं प्राप्स्यति<br>• भारतीयसंस्कृतेः परिचयं प्राप्स्यति<br>• राष्ट्रगौरवम् अनुभविष्यति |

# ॥ पदविका-विशिष्ट-कार्यक्रमाः ॥

# (Diploma Specific Programs)

योगः

| Code | Program | Outcome |
|---|---|---|
| 601 | Diploma in Yoga | As the Yoga is spreading in the world extensively, this course has been started to satisfy the needs of the people to know about Yoga. The outcome of this course is as follows:<br>• The students can know about Yoga and its history.<br>• The students can understand how human body works.<br>• They can get the knowledge of Naturopathy and Ayurveda.<br>• It may be useful in the overall development of the students through the study of Asans, Pranayam, Mudras, Soorya-Namaskar, and Satkarma. |

## मन्दिरव्यवस्थापनम्

| Code | Program | Outcome |
| --- | --- | --- |
| 602 | Diploma in Temple Management | • एतस्य पाठक्रमस्य अध्ययनेन छात्रः शिल्प-स्थापत्य-मूर्तिशास्त्राणां ज्ञानं प्राप्स्यति।<br>• मन्त्रोच्चारणस्य, नीरजनस्य च विधिं ज्ञास्यति।<br>• संस्कृतसम्भाषणस्य सामान्यं ज्ञानं प्राप्स्यति।<br>• विविधेषु मन्दिरेषु निर्वर्त्यमानानाम् उत्सवानां, तेषां व्यवस्थापनस्य ज्ञानं प्राप्स्यति।<br>• छात्राः दर्शनसम्बन्धि-व्यवस्थापनानां ज्ञानं प्राप्स्यति।<br>• मन्दिरव्यवस्थापने अपेक्षितायाः आङ्ग्लभाषायाः संगणकस्य च ज्ञानं प्राप्स्यति। |

## वास्तुशास्त्रम्

| Code | Program | Outcome |
| --- | --- | --- |
| 603 | Diploma in Vastushastra | • ज्योतिषशास्त्रस्य त्रयः स्कन्धाः सन्ति- सिद्धान्तः, संहिता, होरा च । संहितास्कन्धस्य मानवजीवने अत्यन्तमुपादेयता वर्तते । वास्तुशास्त्रं हि संहितास्कन्धस्यान्तर्गतमेव वर्तते । एवं ज्योतिषशास्त्रस्य अन्यतममङ्गमस्ति वास्तुशास्त्रम् । महत्त्वमभिलक्ष्य लोकोपयोगित्वं च अभिलक्ष्यैव श्रीसोमनाथसंस्कृतविश्वविद्यालयेन एकवर्षीय-वास्तुपदविकाऽऽभ्यासक्रमः सञ्चालितः।<br>• अस्मिन् अभ्यासक्रमे बृहद्वास्तुमाला, वास्तुरत्नावली, सरलजन्मपत्रीविज्ञानञ्च सन्दर्भग्रन्थात् स्वीकृत्य वास्तुशास्त्रस्य लोकोपयोगिनः विषयाः सन्निवेशिताः सन्ति, येषाम् अध्ययनेन अध्येतारः वास्तुशास्त्रसम्बन्धितविषयेषु कुशलाः भविष्यन्ति। |

## ज्योतिषशास्त्रम्

| Code | Program | Outcome |
|---|---|---|
| 604 | Diploma in Jyotish | • अनेन पाठ्यक्रमेण छात्राः ज्योतिषस्य त्रयाणां स्कन्धानां (सिद्धान्तसंहिताहोराणाम्) महत्त्वपूर्णव्यवहारिकविषयाणां ज्ञानं करिष्यन्ति तथा च मुहूर्त्त-वास्तु-इत्यादिविषयान् अधीत्य समाजाय अभीप्सितपरामर्शं दास्यन्ति ।<br>• ज्योतिषशास्त्रस्य विकासे स्वकीयं योगदानं दास्यन्ति । |

## कर्मकाण्डम्

| Code | Program | Outcome |
|---|---|---|
| 605 | Diploma in Karmakand | • कर्मकाण्डस्य प्राकृतिकः सम्बन्धः भारतीयसभ्यता-संस्कृतिभ्यां सह भारतीय-जनानां जीवनशैल्या च वर्तते । तत्र संस्काराणां भूमिका लोकानां व्यक्तित्वविकासाय मन्यते, अतो ह्येषा प्रत्याशाऽस्ति अस्य पाठ्यक्रमस्य । |

## वैदिकगणितम्

| Code | Program | Outcome |
|---|---|---|
| 606 | Diploma in Vedic Mathematic | • ज्ञान-विज्ञानानाम् महान् आकरोऽस्ति वेदः । तत्रैव श्रौतकर्मकाण्डप्रसङ्गे शुल्बसूत्राणां कुण्डमण्डपसिद्धेश्चोपयोगानुसारं मण्डपादि-वास्तु-कार्यं क्रियते । तथैव वैदिक-गणितसूत्राणामपि आधुनिक-गणितशास्त्रानुसारं तुलनात्मकानुसन्धानेन राष्ट्रलाभो भविष्यतीति हेतुना पाठ्यक्रमोऽयं प्रचाल्यते विश्वविद्यालयेन । |

## संस्कृत टीचिंग

| Code | Program | Outcome |
|---|---|---|
| 607 | Diploma in Sanskrit Teaching | • संस्कृतम् अधीत्य अधिकांशाः छात्राः शिक्षकाः भूत्वा प्राथमिक-माध्यमिकादि-विविधस्तरेषु संस्कृताध्यापनं कुर्वन्ति। समाजस्य संस्कृतस्य विषये याः धारणाः सन्ति ताः संस्कृतशिक्षकाणां कारणेन एव सन्ति। भविष्यतः संस्कृतशिक्षकाः एव ताः धारणाः परिवर्तयितुम् अपि शक्नुवन्ति। भविष्यतः संस्कृतशिक्षकाः उत्कृष्टाः भवेयुः इति एव अस्य पाठ्यक्रमस्य प्रमुखः हेतुः अस्ति।<br>• अस्य पाठ्यक्रमस्य पठनेन छात्राः संस्कृतमाध्यमेनैव प्रारम्भिकं संस्कृतं पाठयितुं समर्थाः भविष्यन्ति।<br>• पाठनसामर्थ्येन समम् एव छात्रेषु सरलसंस्कृतेन वाचिकं लिखितं व्यवहारं कर्तुम् अपि सामर्थ्यं विकसितं भविष्यति। |

## संगीतम्

| Code | Program | Outcome |
|---|---|---|
| 608 | Diploma in Indian Classical Music | • इमं पाठ्यक्रमम् अधीत्य छात्रः संगीतशास्त्रस्य परिचयात्मकं ज्ञानं प्राप्स्यति<br>• संगीतप्रस्तुतेः प्रारम्भिकं प्रायोगिकं च ज्ञानं प्राप्स्यति<br>• संगीतप्रस्तुतौ प्रारम्भिकस्तरीयं कौशलं प्राप्स्यति<br>• कथाप्रवचनेषु संगीतस्य समन्वयं कर्तुं प्रभविष्यति |

## GRADUATE DIPLOMA IN SANSKRIT, GUJARATI AND HINDU STUDIES,

| Code | Program | Outcome |
|---|---|---|
| 609 | Graduate Diploma in Sanskrit, Gujarati and Hindu Studies (SG&HS) | • This study will introduce students to Hindu scripture.<br>• Students will explore different avenues for further inquiry into Hindu texts.<br>• Students will acquire a novel and distinctive view of Hindu thoughts.<br>• Inquiry into Hinduism’s core beliefs and practices will be fostered.<br>• Students will be introduced to a unique style of interpretation of commentaries and other texts in Sanskrit |

## नाट्यशास्त्रम्

| Code | Program | Outcome |
|---|---|---|
| 610 | Diploma in Theatre (Two Year) | • इमं पाठ्यक्रमम् अधीत्य छात्रः नाट्यशास्त्रस्य सैद्धान्तिकपक्षस्य प्रारम्भिकं ज्ञानं प्राप्स्यति<br>• नाट्यस्य प्रायोगिकं ज्ञानं प्राप्स्यति<br>• अभिनयस्य विविधान् प्रकारान् ज्ञास्यति<br>• मञ्चप्रस्तुतिकौशलं प्राप्स्यति<br>• नात्यविषयकान् आधुनिकसिद्धान्तान् अभिनयप्रयोगान् च ज्ञास्यति<br>• संस्कृतसम्भाषणे कौशलं प्राप्स्यति |

## POST GRADUATE DIPLOMA IN SANSKRIT, GUJARATI AND HINDU STUDIES,

| Code | Program | Outcome |
|---|---|---|
| 402 | Post Graduate Diploma in Sanskrit, Gujarati and Hindu Studies (P.G.D.SG&HS) | • This study will introduce students to Hindu scripture.<br>• Students will explore different avenues for further inquiry into Hindu texts.<br>• Students will acquire a novel and distinctive view of Hindu thoughts.<br>• Inquiry into Hinduism’s core beliefs and practices will be fostered.<br>• Students will be introduced to a unique style of interpretation of commentaries and other texts in Sanskrit |

## ॥पदविका-पाठ्यक्रमाः॥

## (Diploma Courses)

योगः

| Code | Code | Course | Outcome |
|---|---|---|---|
| 601-01. | Paper-1 | Yoga Science | • The students will be familiar with Yoga and its history.<br>• They can improve their health by the knowledge of Ashtang Yoga. |
| 601-02 | Paper-2 | • Anatomy of Human body and Physiology | • To get knowledge about Anatomy of Human body, Physiology and various systems in human body.<br>• To get knowledge of organs of a human body<br>• To get knowledge of the glands in a human body |

| | | | |
|---|---|---|---|
| 601-03 | Paper-3 | Practical | • Students can get the practical knowledge of Asans, Pranayama and Bandhas.<br>• Yogic activities, Soorya-Namskar and Satkarma |
| 601-04 | Paper-4 | Ayurveda and Naturopathy | • To know about Ayurveda and healing methods of Ayurveda<br>• To get information regarding Panchkarma and homely medicines<br>• To know about Naturopathy |

## मन्दिरव्यवस्थापनम्

| Code | Course | Outcome |
|---|---|---|
| 602-01 | प्रश्नपत्रम् - १ | • अस्य पत्रस्य अध्ययनेन छात्रः शिल्प-स्थापत्य-मूर्ति-शास्त्राणां ज्ञानं प्राप्स्यति।<br>• मन्त्रोच्चार-नीराजनादीनां विधिं ज्ञास्यति।<br>• प्रमुखमन्दिराणां नीराजन-भूग-शृङ्गारादिविशयेषु ज्ञानं प्राप्स्यति।<br>• सामान्यसंस्कृतसम्भाषणस्य ज्ञानं प्रप्स्यति। |
| 602-02 | प्रश्नपत्रम् - २ | • अस्य पत्रस्य अध्ययनेन छात्रः मन्दिरेषु निर्वर्त्यमानानां विविधानाम् उत्सवानां तेषां व्यवस्थापनस्य च ज्ञानं प्राप्स्यति।<br>• विविधपूजापद्धतीनां ज्ञानं प्राप्स्यति।<br>• मन्दिरसन्दर्भे नृत्य-नाटक-वाद्य-गान-भजन-प्रवचनपरम्पराणां परिचयं प्राप्स्यति |
| 602-03 | प्रश्नपत्रम् - ३ | • अस्य पत्रस्य अध्ययनेन छात्रः दर्शनसम्बन्धिव्यवस्थापनस्य विविधधार्मिकविधीनां च व्यवस्थासन्दर्भे ज्ञानं प्राप्स्यति<br>• यात्रिकाणां निवासभोजनव्यवस्थां ज्ञास्यति<br>• मन्दिरस्य न्यासव्यवस्थायाः, सुरक्षाव्यवस्थायाः, प्रशासनस्य, सम्पत्तिसम्बद्धानां नियमानां च परिचयं प्राप्स्यति। |
| 602-04 | प्रश्नपत्रम् - ४ | • मन्दिरव्यवस्थापनाय अपेक्षितं आङ्ग्लभाषायाः सामान्यज्ञानं प्राप्स्यति।<br>• मन्दिरव्यवस्थापनाय अपेक्षितं संगणकस्य सामान्यज्ञानं प्राप्स्यति।<br>• मन्दिराणां दृश्य-श्रव्यकार्यक्रमाणां ज्ञानं प्राप्स्यति। |

## वास्तुशास्त्रम्

| Code | Course | Outcome |
|---|---|---|
| 603-01 | प्रश्नपत्र – १ | • अनेन पत्रेण छात्रैः वास्तुशास्त्रस्य सामान्यपरिचयः, पञ्चाङ्गपरिचयः, गृहनिर्माणस्य महत्त्वम्, ग्राममध्ये वास्तुचयनं च सरलतया ज्ञास्यते । अनेन भूमिपरीक्षणस्य प्रकाराः अपि छात्रैः ज्ञास्यन्ते । |
| 603-02 | प्रश्नपत्र – २ | • अनेन पत्रेण वास्तुनिर्माणसमये ग्राह्यकाष्ठानां, त्याज्यकाष्ठानां ज्ञानं, वास्तुकृत्यं, भित्तिज्ञानं, गृहौच्च्यविचारः, दिक्साधनं, शुभप्रदपिण्डसाधनं, गृहद्वारविचारः, आयादिविचारः च छात्रैः विस्तृततया ज्ञास्यते । |
| 603-03 | प्रश्नपत्र - ३ | • अनेन पत्रेण छात्रैः गृहारम्भस्य कालः, द्वारविचारः, गृहारम्भे प्रशस्ताप्रशस्तमास-पक्ष-तिथि-नक्षत्र-लग्नादीनां ज्ञानं, पञ्चाङ्गशुद्धिः, कूपविचारः, गृहस्य आयुविचारः, गृहप्रवेशमुहूर्तः, वास्तुशान्तिविधानम् एतत्सर्वं सम्यक्तया ज्ञास्यते । |

## ज्योतिषशास्त्रम्

| Code | Course | Outcome |
|---|---|---|
| 604-01 | मुहूर्तचिन्तामणिः, बालबोधज्योतिषसारसमुच्चयः, बृहदवकहडाचक्रम्, शीघ्रबोधः | • अनेन प्रश्नपत्रेण छात्राः विभिन्नेषु मुहूर्तेषु शुभाशुभतिथिवारनक्षत्राणां ज्ञानं प्राप्स्यन्ति ।<br>• अनेन प्रश्नपत्रेण छात्राः तिथिवारनक्षत्राणां विभिन्नानां प्रकृतीनां ज्ञानं प्राप्स्यन्ति ।<br>• अनेन छात्राः ग्रहाणां संक्रान्तिज्ञानं सम्यक्तया करिष्यन्ति ।<br>• अनेन छात्राः षोडशसंस्काराणां मुहूर्तानां ज्ञानं प्राप्स्यन्ति ।<br>• अनेन छात्राः यात्रायां विचारणीयविषयानां मुहूर्तज्ञानं करिष्यन्ति ।<br>• अनेन छात्राः वास्तुविषये प्रमुखतथ्यानामपि ज्ञानं करिष्यन्ति । |
| 604-02 | भारतीयकुण्डलीविज्ञानं भारतीयकुण्डलीदर्पणं च | • अनेन छात्राः राशिनिर्माणज्ञानं करिष्यन्ति एतेन सह सर्वेषां संवत्सराणां ज्ञानं, मास-ऋतु-पक्षादीनां ज्ञानञ्च करिष्यन्ति ।<br>• अनेन प्रश्नपत्रेण छात्रैः कुण्डलीनिर्माणज्ञानं करिष्यते ।<br>• अनेन छात्रैः वर्षेशानयनं, मुंथासाधनं, ताजिकशास्त्रस्य च ज्ञानं कर्तुं शक्यते ।<br>• अनेन छात्रैः विश्वस्य कस्यापि स्थानस्य जातकस्य च कुण्डलीनिर्माणं कर्तुं शक्यते ।<br>• अनेन छात्रैः समस्तविश्वस्य अक्षांश-देशान्तरादीनां ज्ञानं सम्यक्तया कर्तुं शक्यते । |

| | | |
|---|---|---|
| 604-03 | भारतीयज्योतिषं, चमत्कारचिन्तामणिः, सचित्रसामुद्रिकरहस्यं च | • अनेन पत्रेण छात्राः हस्तरेखाज्ञानेन सह समस्तसामुद्रिकरहस्यस्य ज्ञानं करिष्यन्ति।<br>• अनेन छात्राः राशिग्रहादीनां परिचयः स्वरूपस्य च ज्ञानं करिष्यन्ति।<br>• अनेन विविधानां योगानां ज्ञानं, सूर्यादिग्रहाणां तन्वादिभावविषयकज्ञानं सम्यक्तया कर्तुं शक्यते। |

**कर्मकाण्डम्**

| Code | Course | Outcome |
|---|---|---|
| 605-01 | प्रारम्भिकपूजनम् एवं स्तुतिः | • कर्मकाण्डसम्पादनाय स्तोत्रज्ञानं नितान्तमपेक्षितं वर्तते। अपि च प्रारम्भिकपूजनज्ञानाय गणेशपूजनज्ञानस्यावश्यकता विद्यते।एतदर्थं एते विषयाः पाठ्यक्रमे निर्धारिताः सन्ति। |
| 605-02 | संस्कारकर्म-शान्तिविधिश्च | • उत्तमसमाजनिर्माणे संस्काराणां महत्त्वपूर्णभूमिका वर्तते। संस्कारैः संस्कारितजनाः किमपि पापकर्मकर्तुं न प्रभवन्ति। पुरुषस्य कष्टनिवारणाय बहुविधाः शान्त्योपायाः वर्तन्ते, अतः तेषां ज्ञानस्यावश्यकता विद्यते। पुनः अनेन पाठ्यक्रमेण दुर्नीतिनिवारणं कर्त्तुं शक्यते। |
| 605-03 | उत्तरक्रिया-श्राद्धविधिश्च | • श्रद्धया श्राद्धम्। पितृऋणात् मुक्तिप्राप्त्यर्थं श्राद्धानाम् आवश्यकता विद्यते। ‘श्राद्धं न कुरुते यः तस्य रक्तं पिबन्ति ते’ इति वचनानुसारं ज्ञायते यत् श्राद्धं भारतीयसंस्कृतेः एकम् अभिन्नम् अङ्गमस्ति। येनास्माकं भारतीयसंस्कृतौ पितृपुरुषाणां कृते कीदृशमादरमस्तीति छात्रा अवगच्छन्तु इति लक्ष्यम्। |

## वैदिकगणितम्

| Code | Course | Outcome |
|---|---|---|
| 606-01 | प्राचीन वेद कालीन गणित Paper-1 | • प्राचीनवैदिकग्रन्थे प्रतिपादित-वैदिकगणितशास्त्रविषये छात्राणां ज्ञानं भविष्यति ।वैदिकवाङ्मये कानिचित्सूक्तानि वर्तन्ते,येषाम् अध्ययनेन अङ्कानां मिश्रणं, वियोगीकरणं, गुणनं हरणं च अत्यन्त-स्वल्पीयसा कालेनापि कर्तुं शक्यते । अतः भारतीयगणितशास्त्रस्येतिहासविषये छात्रेषु जिज्ञासा उत्पन्ना भवेत् इति धिया पाठ्यक्रमोऽयं निर्धारितः । |
| 606-02 | शास्त्रकालीन गणित | • विकासदृष्ट्या या परम्परा पद्धतिर्वा वैज्ञानिकैः आश्रीयते सा एव गाणितिकी पद्धतिः कथ्यते । अतः वैदिककालतः आरभ्य वर्तमानसमयपर्यन्तं गणितस्य या परम्परा पद्धतिर्वा वर्तते तस्याः विवेचनात्मकमध्ययनं छात्रैः करिष्यते ।<br>• शुल्वसूत्राणां प्रभावः आधुनिकरेखाविज्ञाने ज्यामितिकविज्ञाने च कीदृशो वर्तते इति छात्रान् अवबोधयितुमेषः पाठ्यक्रमः निर्धारितः । |
| 606-03 | श्रीभारतीकृष्णतीर्थ विरचित वेदगणित | • श्रीभारतीकृष्णतीर्थस्वामिना प्रतिपादितस्य पुस्तकस्य सूत्रानुसारं छात्राणामुपकाराय प्रयोगविज्ञानं भविष्यति ।<br>• वैदिकगणितस्य विवेचनं संस्कृतभाषायां वर्तते । अतः छात्रेषु प्राचीनभारतीयगणितस्य पारिभाषिकशब्दानां ज्ञानं भवेदिति लक्ष्यम् । |

| Code | Course | Outcome |
|---|---|---|
| 607-01 | संस्कृतपाठन-अभियोग्यता | • अस्य पत्रस्य पठनेन छात्राः प्रारम्भिकस्तरीयं सरलं संस्कृतं संस्कृतमाध्यमेनैव पाठयितुं समर्थाः भविष्यन्ति।<br>• तथा पाठने आवश्यकानां पाठ्यांशानां निर्धारणं कर्तुं शक्ष्यन्ति।<br>• पाठ्यांशानुगुणं समुचितायाः आकर्षिकायाः पाठ्यसामग्रेः निर्माणं कर्तुं शक्ष्यन्ति।<br>• प्रभाविरीत्या संस्कृतेन संस्कृतपाठनं कर्तुं शक्ष्यन्ति। |
| 607-02 | संस्कृतलेखन-अभियोग्यता | • अस्य पत्रस्य पठनेन छात्राः सरलेन किन्तु शुद्धेन संस्कृतेन स्वविचाराणाम् लिखिताम् अभिव्यक्तिं कर्तुं क्षमाः भविष्यन्ति।<br>• संस्कृतलेखने सम्भावितानां दोषाणां ज्ञानं तत्परिहारान् च ज्ञास्यन्ति।<br>• हिन्द्यादि-आधुनिकाभाषाणाम् अपेक्षया संस्कृतभाषायाः लेखने ये विशेषाः सन्ति तान् सम्यग् ज्ञास्यन्ति। |
| 607-03 | संस्कृतसम्भाषण-अभियोग्यता | • अस्य पत्रस्य पठनेन छात्राः सरलेन किन्तु शुद्धेन संस्कृतेन स्वविचाराणां वाचिकीम् अभिव्यक्तिं कर्तुं क्षमाः भविष्यन्ति<br>• सरलेन संस्कृतेन सरलान् संवादान् प्रस्तोतुं शक्ष्यन्ति।<br>• पाठनकाले अपि सुगमस्य संस्कृतस्य प्रयोगं कर्तुं शक्ष्यन्ति। |

## संगीतम् (गानं स्वरवाद्यवादनं च)

| Code | Course | Outcome |
|---|---|---|
| 608-01 | क्रियात्मकम् अथवा प्रायोगिकं प्रश्नपत्रम् | • अस्य पत्रस्य पठनेन छात्रः नियतरागाणां परिचयं प्राप्स्यति, आलापं, गानप्रकारम्, लक्षणगीतं च प्रस्तोतुं प्रभविष्यति<br>• नियतरागेषु ठुमरी, दारा चेति उपशास्त्रीयान्, लोकगीतं, गरबा, प्रार्थना, भजनं चेति सुगमसङ्गीतप्रकारान् प्रस्तोतुं प्रभविष्यति<br>• नियततालापानां परिचयात्मकं ज्ञानं प्राप्स्यति, तान् प्रस्तोतुं च प्रभविष्यति<br>• हिन्दुस्तानीसङ्गीतपद्धत्यनुसारं दशानां थाट-प्रकाराणां, विंशतेः अलङ्काराणां प्रस्तुतिं कर्तुं प्रभविष्यति |
| 608-02 | सैद्धान्तिकम् अथवा लिखितं प्रश्नपत्रम् | • नियतरागाणां आरोह-अवरोह-वादि-संवादि-तीव्र-कोमल-वर्ज्य-स्वराणां ज्ञानं प्राप्स्यति<br>• साङ्गीतिकशब्दावल्याः ज्ञानं प्राप्स्यति<br>• नियततालापानां गीतप्रकाराणां लिपिबद्धतया प्रस्तुतेः ज्ञानं प्राप्स्यति<br>• सङ्गीतस्य, सङ्गीतप्रकाराणां, सङ्गीतकाराणां च सामान्यं परिचयं प्राप्स्यति |

संगीतम्(तालवादनम्, पखावजवादनम्)

| Code | Course | Outcome |
| --- | --- | --- |
| 608-01 | क्रियात्मकम् अथवा प्रायोगिकं प्रश्नपत्रम् | • अस्य पत्रस्य पठनेन छात्रः नियतरागाणां परिचयं प्राप्स्यति, आलापं, गानप्रकारम्, लक्षणगीतं च प्रस्तोतुं प्रभविष्यति<br>• नियतरागेषु ठुमरी, दारा चेति उपशास्त्रीयान्, लोकगीतं, गरबा, प्रार्थना, भजनं चेति सुगमसङ्गीतप्रकारान् प्रस्तोतुं प्रभविष्यति<br>• नियततालापानां परिचयात्मकं ज्ञानं प्राप्स्यति, तान् प्रस्तोतुं च प्रभविष्यति<br>• हिन्दुस्तानीसङ्गीतपद्धत्यनुसारं दशानां थाट-प्रकाराणां, विंशतेः अलङ्काराणां प्रस्तुतिं कर्तुं प्रभविष्यति |
| 608-02 | सैद्धान्तिकम् अथवा लिखितं प्रश्नपत्रम् | • नियतरागाणां आरोह-अवरोह-वादि-संवादि-तीव्र-कोमल-वर्ज्य-स्वराणां ज्ञानं प्राप्स्यति<br>• साङ्गीतिकशब्दावल्याः ज्ञानं प्राप्स्यति<br>• नियततालापानां गीतप्रकाराणां लिपिबद्धतया प्रस्तुतेः ज्ञानं प्राप्स्यति<br>• सङ्गीतस्य, सङ्गीतप्रकाराणां, सङ्गीतकाराणां च सामान्यं परिचयं प्राप्स्यति |

GRADUATE DIPLOMA IN SANSKRIT, GUJARATI AND HINDU STUDIES

| Code | Course | Outcome |
|---|---|---|
| 609-01 | Sanskrit Language | • This study will introduce students to Sanskrit grammar.<br>• Students will acquire a novel and distinctive view of Hindu thoughts.<br>• |
| 609-02 | Gujarati Language | • This study will introduce students to Gujarati grammar.<br>• Students will acquire a novel and distinctive view of Hindu thoughts.<br>• |
| 609-03 | Hindu Studies | • This study will introduce students to Hindu scripture.<br>• Students will explore different avenues for further inquiry into Hindu texts.<br>• Inquiry into Hinduism’s core beliefs and practices will be fostered.<br>• In study students learn little parts of *ṛgvedaḥ,* |

| | | |
|---|---|---|
| | | *śrīmadbhādavatpurāṇam, śrīmadbhagavadgītā, upaniṣad, vacanāmṛtam etc.*<br>• Students will acquire a novel and distinctive view of Hindu thought.<br>• They will capture new thoughts in the perspective of the Swaminarayan theology. |

**नाट्यशास्त्रम्**

| Code | Course | Outcome |
|---|---|---|
| 610-01 | प्रश्नपत्रम् - १ | • अस्य पत्रस्य पठनेन छात्रः भरतमुनिकृतस्य नाट्यशस्त्रस्य परिचयात्मकं ज्ञानं प्राप्स्यति<br>• नाट्यस्य विविधानि तत्त्वानि ज्ञास्यति<br>• अभिनयस्य परिभाषाम्, अभिनयस्य विविधान् प्रकारान् ज्ञास्यति<br>• रूपकस्य भेदान् ज्ञास्यति<br>• संस्कृतेन सम्भाषणे समर्थः भविष्यति |
| 610- | आङ्गिकाभिनयः | • अस्य पत्रस्य पठनेन छात्रः आङ्गिकाभिनयस्य भेदान् ज्ञास्यति |

| | | |
|---|---|---|
| 02 | | • शारीराभिनयान् चेष्टाभिनयान् च् ज्ञास्यति<br>• अभिनयानां प्रायोगिकं निदर्शनं करोष्यति<br>• आङ्गिकाभिनये रङ्गनिर्देशानां समन्वयं करिष्यति |
| 610-03 | वाचिकाभिनयः, सात्त्विकाभिनयः च | • अस्य पत्रस्य पठनेन छात्रः पाठ्यगुणान् नाट्यशास्त्रीयाः युक्तीश्च ज्ञास्यति<br>• सात्त्विकाभिनयान् भावाभिव्यञ्जकान् अनुभावान् रसनिष्पत्तौ तद्भूमिकां च ज्ञास्यति<br>• वाचिकाभिनयस्य प्रायोगिकं निदर्शनं करिष्यति<br>• संस्कृतरूपकेषु विविधोक्तीनां वाचिकं सात्त्विकं चाभिनयं प्रयोक्ष्यति |
| 610-04 | मञ्चप्रस्तुतिः | • अस्य पत्रस्य पठनेन छात्रः संस्कृतसम्भाषणस्य भाववाहिपठनं करिष्यति<br>• संस्कृतनाट्यसाहित्यात् विविधदृश्यानां विविधैः अभिनयैः सह प्रयोगं प्रस्तोष्यति<br>• एकाङ्किरूपके अभिनयं नेपथ्यकर्म च करिष्यति |
| 610-05 | नाट्यसिद्धान्तः | • अस्य पत्रस्य पठनेन छात्रः वस्तुविधानं पात्रविधानं च ज्ञास्यति<br>• नाटकस्य सविस्तरं लक्षणं ज्ञास्यति<br>• प्रकरणस्य लक्षणानि उदाहरणानि च ज्ञास्यति<br>• रूपकानां विविधान् प्रकारान् ज्ञास्यति |
| 610-06 | नाट्यप्रयोगः | • अस्य पत्रस्य पठनेन छात्रः नाट्यगृहविषये तदङ्गविषये च परिचयं प्राप्स्यति<br>• नेपथ्यविधिं ज्ञास्यति<br>• पुस्तरचनां प्रतिशीर्षरचनां च ज्ञास्यति<br>• अलङ्कारनिर्माणं वेशभूषां च ज्ञास्यति |
| 610- | प्रयोगरूढयः | • अस्य पत्रस्य पठनेन छात्रः पूर्वरङ्गं ध्रुवागानं च ज्ञास्यति |

| | | |
|---|---|---|
| 07 | | • संस्कृतरूपकेषु द्विकेन्द्रि दृश्यं, परिक्रमणं, रङ्गसूचनं, वृत्तिं, प्रवृत्तिं च ज्ञास्यति, तत्प्रयोगं च करिष्यति<br>• लोकधर्मि-नाट्यधर्मि-दैवीसिद्धि-मानुषीसिद्धि-लक्षणानि ज्ञास्यति, तत्प्रयोगं च करिष्यति<br>• नाट्यलेखनाभिनयप्रयोगसम्बन्धे आधुनिकसिद्धान्तान् ज्ञास्यति |
| 610-08 | मञ्चप्रस्तुतिः (प्रायोगिकम्) | • अस्य पत्रस्य पठनेन छात्रः संस्कृतसम्भाषणं ज्ञास्यति, तत्प्रयोगं च करिष्यति<br>• संस्कृतरूपकाणाम् अभिनयस्य मञ्चप्रस्तुतिं करिष्यति<br>• संस्कृतरूपकेषु नेपथ्यकर्मविधानं ज्ञास्यति प्रयोक्ष्यति च<br>• मञ्चप्रस्तुतौ कौशलं प्राप्स्यति |

## POST GRADUATE DIPLOMA IN SANSKRIT, GUJARATI AND HINDU STUDIES

| Code | Course | Outcome |
|---|---|---|
| 402-01 | Sanskrit Language | • This study will introduce students to Sanskrit grammar.<br>• Students will acquire a novel and distinctive view of Hindu thoughts.<br>• |
| 402- | Gujarati | • This study will introduce students to Gujarati grammar. |

| | | |
|---|---|---|
| 02 | Language | • Students will acquire a novel and distinctive view of Hindu thoughts.<br>• |
| 402-03 | Hindu Studies | • This study will introduce students to Hindu scripture.<br>• Students will explore different avenues for further inquiry into Hindu texts.<br>• Inquiry into Hinduism’s core beliefs and practices will be fostered.<br>• In study students learn little parts of *ṛgvedaḥ, śrīmadbhādavatpurāṇam, śrīmadbhagavadgītā, upaniṣad, vacanāmṛtam etc.*<br>• Students will acquire a novel and distinctive view of Hindu thought.<br>• They will capture new thoughts in the perspective of the Swaminarayan theology. |